
उल्लासः

प्रवेशिका, तृतीयः भागः



उल्लासः

प्रवेशिका, तृतीयः भागः



विद्ययाऽमृतमश्नुते
एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING

आमुखम्

राष्ट्रिय-शिक्षा-नीतिः २०२० पञ्चदश-वर्षीयाणाम् अथवा ततः अधिक-आयुःवर्गीयाणां सर्वेषाम् तेषां सर्वेषाम् अपि जनानां साक्षरतानिमित्तम् अवसरनिर्माणे प्रतिबद्धतां करोति। ये जनाः कैश्चिदपि कारणैः अक्षर-संख्ययोः ज्ञानम् अर्जयितुं न शक्तवन्तः । सन्दर्भेऽस्मिन् इति कार्यक्रमः शिक्षा-नीतेः अनुशंसानां क्रियान्वयनार्थं भारत-सर्वकारेण २०२२ तमे वर्षे अप्रेल-मासस्य प्रथमे दिनाङ्के 'उल्लासः' प्रारब्धः । यस्मिन् वयस्क-शिक्षायाः सर्वेऽपि पक्षाः समायोजिताः सन्ति। उल्लासस्य उद्देश्यं केवलम् आधारभूत-साक्षरता एवञ्च संख्याज्ञानम् एव न अस्ति, अपितु २१ शताब्दस्य नागरिकाणां कृते ये आवश्यकाः घटकाः भवन्ति तेषाम् अपि समायोजनम् अत्र क्रियते यथा – महत्त्वपूर्णानि जीवन-कौशलानि (वित्तीय-साक्षरता, अङ्कीय-साक्षरता (डिजिटल-साक्षरता), वाणिज्य-कौशलम्, स्वास्थ्य-संरक्षणम्, जागरूकता, शिशुसंरक्षणम्, शिक्षा एवं परिवारकल्याणम्), व्यावसायिक-कौशल-विकासः (स्थानीय-वृत्तिम् उद्दिश्य) आधारभूता शिक्षा (प्रारम्भिकम्, माध्यमिकं माध्यमिकस्तरस्य च समकक्षतायाः सहितम्) एवञ्च सतत-शिक्षा (कला, विज्ञानम्, प्रौद्योगिकी, संस्कृतिः, क्रीडा मनोरञ्जनं च इत्यादिषु समग्र-प्रौढशिक्षा-पाठ्यक्रमेण सहैव स्थानीयानां शिक्षार्थिनां कृते रुचेः उपयोगस्य च अन्ये विषयाः यथा – महत्त्वपूर्ण-जीवन-कौशलेषु अधिकोन्नतसामग्र्या सह)। अनेन प्रकारेण इयं योजना मानवस्य व्यक्तित्व-विकासं समग्रतया अवलोकयति एवञ्च न्यायसंगतं, तर्कशीलम् एवञ्च उत्कृष्टस्य नागरिकस्य निर्माण-दिशि कार्यं करोति।

'उल्लास'स्य अर्थः वर्तते – समाजे सर्वेषां जनानां कृते आजीवनम् अधिगमस्य बोधः। (ULLAS- Understanding of Lifelong Learning for All in Society) एवञ्च 'जन जन साक्षर' इति उल्लासस्य आदर्शवाक्यं वर्तते । नव-भारत-साक्षरता-कार्यक्रमस्य उल्लासस्य अभिलेखे उल्लिखितं वर्तते यत् २०११ तमे वर्षे कृतायाः जनगणनायाः अनुसारेण देशे पञ्चदश-वर्षीयाणां ततः अधिक-आयुवर्गीयाणां वा अक्षरज्ञानविहीनानां जनानां सङ्ख्या २५.७६ कोटिः (पुरुषाः ०९.०८ कोटिः, महिलाः १६.६८ कोटिः) वर्तते। २००९-२०१० वर्षतः २०१७-२०१८ वर्ष-पर्यन्तं साक्षर-भारत-कार्यक्रमस्य अन्तर्गतं प्रमाणितानां साक्षर-जनानां सङ्ख्यायां ०७.६४ कोटि-परिमितस्य प्रगतिम् अवलोक्य अनुमियते यत् भारते अधुना अपि प्रायः १८.१२ कोटि-परिमिताः वयस्काः अक्षरज्ञानविहीनाः सन्ति ।" राष्ट्रिय-शिक्षा-नीतिः २०२० तः २०३० वर्ष-पर्यन्तं १०० प्रतिशतं शतप्रमाणकं साक्षरतार्थं लक्ष्यं निर्धारयति एवञ्च राष्ट्रिय-शैक्षिक-अनुसन्धानम् एवं प्रशिक्षण-परिषदि राष्ट्रिय-साक्षरता-केन्द्रस्य स्थापनायाः अनुशंसां करोति। अस्य लक्ष्यस्य प्राप्तये राष्ट्रियस्तरे राज्यस्तरे च अनेके प्रयासाः नैरन्तर्येण क्रियमाणाः सन्ति क्रियन्ते।

भवितुमर्हति यत् उल्लासे सम्मिलिताः शिक्षार्थिनः साक्षराः न भवेयुः चेदपि ते शिक्षिताः अवश्यं भविष्यन्ति एवञ्च स्वजीवने समागतानां सङ्गर्षाणां तथा विभिन्न-आह्वानानां च सम्मुखीकर्तुम् एवं च जीवने उचितं निर्णयं स्वीकर्तुं समर्थाः भविष्यन्ति। एते शिक्षार्थिनः स्व-जीवनस्य विविधेषु सन्दर्भेषु स्वभाषायाः अन्यभाषाणां वा मौखिक प्रयोगं च कुर्वन्ति एवञ्च गणितीयावबोधेन सह स्व-कार्येषु विनिमयम् अपि कुर्वन्ति । पठनं लेखनं सङ्ख्याज्ञानं चैव एतेषाम् आवश्यकता यया तेषां गुणवत्तापूर्णस्य च जीवनस्य मार्गः प्रशस्तः भवेत्।

साक्षरता काचित् बृहदवधारणा वर्तते, या केवलम् अक्षरज्ञान-सङ्ख्याज्ञान-पर्यन्तं परिसीमिता नास्ति, अपितु "विभिन्नेषु सन्दर्भेषु विषयाणां दृश्य-श्रव्य-अङ्कीय-उपकरणानाम् उपयोगेन सञ्ज्ञानस्य, अवगमनस्य, रचनायाः, गणनायाः संवादस्य च क्षमता वर्तते ।" (अन्ताराष्ट्रिय-साक्षरता-सङ्घः (आई.एल.ए.) उद्धृतम्) । अनेन प्रकारेण आधारभूत-साक्षरता संख्याज्ञानं च प्रकार्यात्मकम् अस्ति, एवञ्च उत्तमतया जीवनयापने सहायकम् अस्ति ।

"आधारभूत-साक्षरतायाः प्राप्तिः, शिक्षायाः प्राप्तिः, जीवनोपार्जनस्य च अवसर-प्राप्तिः प्रत्येकं भारतीयस्य अधिकारः अस्ति । साक्षरता एवञ्च आधारभूत-शिक्षा कस्यचिदपि वैयक्तिकम्, नागरिकम्, सामाजिकम्, आर्थिकम् एवञ्च जीवनपर्यन्तं शिक्षायाः अवसराणाम् अनेकानि नूतनस्य जगतः द्वाराणि उद्घाटयति । एतत् नूतनं जगत् वैयक्तिकस्तरे व्यावसायिकस्तरे च अभिवर्धनार्थं सहायकं भवति ।" राष्ट्रिय-शिक्षा-नीतिः २०२० इत्यस्याः परिप्रेक्ष्यं (विषयम्) मनसि संस्थाप्य शिक्षामन्त्रालयस्य नवभारत-साक्षरता-कार्यक्रमस्य अन्तर्गतं निरक्षराणां शिक्षार्थिनां कृते चतुर्षु भागेषु एतस्याः उल्लास-प्रवेशिकायाः निर्माणं कृतम् अस्ति । एताः प्रवेशिकाः समेकितरूपेण निर्मिताः सन्ति, यासु गणितं भाषा च द्वयमपि सम्मिलितम् अस्ति । विषयरूपेण १३ विषयाः सुनिश्चिताः सन्ति ये प्रायः अस्माकं समीपे दृश्यन्ते श्रूयन्ते प्रयोज्यन्ते च । ते च विषयाः – परिवारः प्रतिवेशः च, संवादः, अस्माकं जीवनशैली, अस्माकं परिवेशः, आहारः स्वास्थ्यं च, मतदानम्, न्यायसम्बद्धं ज्ञानम्, विभिन्नाः आपदः, समयः एव करोति बलाबलम्, यात्रा, मनोरञ्जनम्, वित्तीय-साक्षरता, अङ्कीय-साक्षरता इति । भाषायाः अन्तर्गतम् एतैः विषयैः एव युक्तानि सार्थकानि रोचकवस्तूनि एवञ्च प्रतिदिनम् आवश्यकानाम् आयव्ययादीनां ज्ञानाय संस्कृतभाषायाः अंकगणितस्य च पठनाय अवसराः कल्पिताः सन्ति । शिक्षार्थिनां पठनस्य लेखनस्य अंकगणितस्य च शिक्षणाय सारल्यं भवेत् इत्येतदर्थम् एतस्याः मार्गदर्शिकायाः अपि निर्माणं कृतम् अस्ति । एषा मार्गदर्शिका शिक्षकाणां सहयोगिनां च उपयोगाय निर्मिता वर्तते । अनेन शिक्षार्थिनां शिक्षणे इतोऽपि सारल्यं भविष्यति । अस्यां मार्गदर्शिकायां साक्षरतायाः व्यापकं परिप्रेक्ष्यं, भाषायाः गणितस्य च शिक्षणबिन्दवः एवञ्च अधिगमप्रक्रियायाः विषये विस्तृता चर्चा वर्तते । प्रवेशिकासु मार्गदर्शिकायां च प्रदत्ताः बिन्दवः परामर्शाय वर्तन्ते । शिक्षार्थिनां स्तरं, क्षमताम्, आवश्यकताः एवञ्च स्थानीय-परिवेशं ज्ञात्वा एतेषु आवश्यकतानुसारं परिवर्तनं कर्तुं शक्यते ।

'उल्लासः' प्रवेशिकायां प्रामुख्येण सुविचार्य शिक्षार्थिनां स्वयंसेविनां शिक्षकाणां च कृते आधारभूत-साक्षरतया संख्याज्ञानेन च सम्बद्धानां शिक्षणबिन्दूनाम् अन्तर्जालीय-प्रतिमानानाम् अथवा चलच्चित्राणां निर्माणम् अपि कृतम् अस्ति, यत् 'दीक्षामञ्चे' (DIKSHA Portal) सर्वेषां कृते शिक्षा (सभी के लिये शिक्षा) इति वर्टिकल एवञ्च एनसीईआरटी इत्यस्य 'यूट्यूब चैनल' @NCERTOFFICIAL इत्यस्मिन् उपलब्धम् अस्ति । मार्गदर्शिकायाः चलच्चित्रकार्यक्रमस्य च सहयोगेन शिक्षार्थिनां शिक्षणाधिगमे सहयोगः प्राप्यते ।

परिषद् प्रवेशिकानां मार्गदर्शिकानां च निर्माणे सम्मिलितानां सर्वेषाम् अपि विषय-विशेषज्ञानाम् एवञ्च परिषदः संकाय-सदस्यानां परियोजनायाः कार्यकर्तृणां च परिश्रमस्य कृते कृतज्ञतां प्रकटयति । तथैव तेषां सर्वेषां रचनाकाराणां संस्थाः प्रति अपि वयं कृतज्ञाः स्मः, ये याश्च अस्माकं पुस्तके स्वस्य सामग्रीः प्रयोक्तुम् उदारतापूर्वकं सहयोगं कृतवन्तः / कृतवत्यः । एतासां प्रवेशिकानां परिष्कारार्थम् उत्तरोत्तरम् अभिवर्धनार्थं च भवतां/भवतीनां परामर्शानां वयं स्वागतं कुर्मः ।

दिनेश प्रसाद सकलानी
निदेशकः
राष्ट्रिय-शैक्षिक-अनुसंधानम्
एवञ्च प्रशिक्षण-परिषद्

सितंबरमासः २०२४
नवदेहली

स्वयंसेवि-शिक्षकैः सह वार्तालापः

आधारभूतसाक्षरता सङ्ख्याज्ञानं च (प्रौढशिक्षा) भारतसर्वकारद्वारा प्रायोजितायाः उल्लास-नामक-योजनायाः कश्चन महत्त्वपूर्णः भागः । यस्य उद्देश्यं तु पञ्चदशवर्षीयाणां पञ्चदशाधिकवर्षीयाणां च शिक्षार्थिनां साक्षरता वर्तते । उल्लासयोजनायां तेषां/तासां पठन-लेखनयोः सङ्ख्यायाः च शिक्षणं कर्तव्यम्, ये/याः केनापि कारणेन विद्यालयीयशिक्षां न प्राप्तवन्तः/प्राप्तवत्यः अथवा न अनुवर्तितवन्तः/अनुवर्तितवत्यः । अतः सामाजिकचेतनाकेन्द्रं ये निरक्षराः शिक्षार्थिनः आगच्छन्ति अथवा अन्ये भवतां सम्पर्के ये निरक्षराः शिक्षार्थिनः सन्ति, ते पठन-लेखन-प्रक्रियायां विभिन्नस्तरयुक्ताः भवितुम् अर्हन्ति ।

अस्माभिः इदम् अपि अवगन्तव्यं यत् एते शिक्षार्थिनः विवेकिनः, जीवनानुभविनः च सन्ति इति । ते प्रतिकूलपरिस्थितौ अपि जीवनं यापितवन्तः एवञ्च परिस्थितिम् अनुकूलां कर्तुम् अपि जानन्ति । प्रायः एतेषु बहवः गृहे अथवा बहिः कस्मिंश्चित् कार्ये संलग्नाः अथवा किमपि उत्तरदायित्वं निर्वहन्तः स्युः । एतद् अस्माकम् उद्देश्यम् अस्ति यत् पठनलेखनाभ्यासेन एवञ्च गणितज्ञानेन तेषां जीवनं इतोऽपि सरलं भवेत्, एवञ्च तेषाम् अनुभवं ते इतोऽपि गभीरं विस्तृतं च कर्तुं शक्नुयुः इति । एतेन प्राप्तां क्षमतां जीवनस्य विभन्नासु परिस्थतिषु उपयोक्तुम् अपि शक्नुयुः । एतेन तेषाम् आत्मविश्वासः इतोऽपि वर्धेत ।

स्वयंसेवि-शिक्षकैः एतत् ज्ञातव्यम् –

- यान् शिक्षार्थिनः वयं साक्षरान् कर्तुम् इच्छामः ते पञ्चदशवर्षीयाः पञ्चदशाधिकवर्षीयाः च सन्ति । कदाचित् ते अस्माकम् अपेक्षया अनुभविनः स्युः । अतः अस्माभिः तेषाम् अनुभवस्य आदरः करणीयः ।
- ते स्वीयानि नित्यकार्याणि स्वीयशैल्या एव कुर्वन्ति । तेषां कौशलस्य अपि अस्माभिः आदरः करणीयः ।
- पठनम् उपयोगीति यदा ते चिन्तयेयुः तदा एव ते पठेयुः । पूर्णतया सिद्धाः भूत्वा एव तान् अध्यापयन्तु येन अधिगमस्य पूर्णं लाभं ते प्राप्तुं शक्नयुः । एतद्द्वारा वयं बहु किमपि नूतनं ज्ञातुं शक्नुमः एवञ्च अस्माकम् आत्मविश्वासः अपि वर्धेत । अतः वयं पूर्णतया सिद्धाः भूत्वा परिश्रमेण आदरेण च शिक्षार्थिनः पाठयेम ।
- **उल्लास**-प्रवेशिका संस्कृतभाषायाः गणितस्य च एकीकृतं स्वरूपम् अस्ति । अत्र प्रत्येकं पाठे संस्कृतभाषायाः क्षमतानां गणितीयक्षमतानां च विकासाय पर्याप्तावसराः कल्पितास्सन्ति ।
- शिक्षार्थिनः प्रायः संस्कृतेन भाषितुं संस्कृतम् अवगन्तुं च समर्थाः एव, किन्तु पठनस्य लेखनस्य वा अवसरः न प्राप्तः इत्यतः ते पठने लेखने च कष्टम् अनुभवन्ति । केषाञ्चित् शिक्षार्थिनाम् अक्षरज्ञानम् अपि स्यात् । एवमेव कश्चन गणितस्य मौखिकप्रयोगे कुशलः स्यात् एवञ्च अनौपचारिकरूपेण गणनां कर्तुम् अपि समर्थः स्यात्, किन्तु अङ्कानाम् अवगमने गणितीय-समस्यानां च परिहारे समस्या स्यात् ।

- पाठेषु सर्वेषां चित्राणां, कथानां, कवितानाम् अथवा अन्यस्याः कस्याश्चित् रोचक-सामग्र्याः माध्यमेन संस्कृतभाषायाः अक्षराणि, नूतनशब्दाः, पाठ्यवस्तुनः पठनं लेखनं च शिक्षितम् अस्ति । अस्याः एव पाठ्य-सामग्र्याः सन्दर्भे गणिताङ्काः गणनं च गणितीय-समस्यानां समाधानं च शिक्षितम् । यदि अपेक्षितं तर्हि वयम् अस्माकम् इच्छानुसारं शिक्षण-बिन्दूनाम् आधारेण अन्यासां पाठ्य-सामग्रीणाम् अपि उपयोगं कर्तुं शक्नुमः । वयं शिक्षार्थिनां स्तरानुसारं, क्षमतायाः अनुसारम् आवश्यकतानाम् अनुसारं च पाठ्य-सामग्र्याः सङ्ग्रहणं कर्तुं शक्नुमः ।
- प्रवेशिकायां प्रदत्तानां चित्राणां पूर्णतया प्रयोगं कर्तुं शक्नुमः । अनुमानेन पठनं लेखनं च शिक्षयितुं चित्राणि सहायकानि भवन्ति । कस्मिंश्चित् चित्रे एकम् एव वस्तु भवितुम् अर्हति । कस्मिंश्चित् चित्रे काचित् पूर्ण-प्रक्रिया घटना वा भवितुम् अर्हति । अतः आवश्यकतायाः अनुसारं चित्राणां प्रयोगं कर्तुं शक्नुमः । चित्राणि शिक्षार्थिनः चर्चां कर्तुं वा स्वानुभवान् वक्तुं वा प्रेरयन्ति ।
- ***उल्लास-प्रवेशिकायाः*** लेखनार्थं शिक्षार्थिभ्यः प्रथमपृष्ठे विशेषरूपेण पर्याप्तं स्थलं प्रदत्तम् अस्ति तत्र ते स्वस्य नाम, गृहसङ्केतं, सम्पर्कविवरणानि (चलदूरवाणी-सङ्ख्या इत्यादि) लेखितुं शक्नुवन्ति । शिक्षार्थिनः स्वजीवने स्वस्य नाम-आदिकं लेखितुम् अनेकान् अवसरान् प्राप्नुवन्ति । एतत् कार्यं तेषां जीवनेन सह सम्बद्धम् अस्ति । कदाचित् कश्चन शिक्षार्थी स्वस्य नाम लेखितुं न शक्नुयात् । तदा अध्यापकः तस्य नाम, गृहसङ्केतं, चलदूरवाणी-सङ्ख्यां च लिखित्वा प्रदर्शयेत् । दृष्ट्वा लेखितुं शिक्षार्थिनः सहायतां च कुर्यात् ।
- ***उल्लास-प्रवेशिकायाः*** चतुर्णाम् अपि भागानाम् अन्ते संस्कृतभाषायाः वर्णमाला प्रदत्ता अस्ति । अस्याः उद्देश्यम् अस्ति यत् शिक्षार्थिनः संस्कृतभाषायाः अक्षराणि अवगच्छन्तु इति । परन्तु अस्य आरम्भः तु उचितसामग्र्या एव भवेत् । यदा ते अक्षराणां परिचयं प्राप्नुवन्ति तदा वर्णमाला-द्वारा अक्षराणाम् अवगमनं कारयितुं शक्यते । यः शिक्षार्थी पूर्वमेव संस्कृतभाषायाः अक्षराणि जानाति सः वर्णमाला-युक्तस्य पृष्ठस्य उपयोगम् आरम्भे एव कर्तुं शक्नोति ।
- संस्कृत-वर्णमालायाः पुनः पुनः दर्शनेन शिक्षार्थिनाम् अक्षराणां सञ्ज्ञानं सुदृढं भवति । ते अनुमानेन अक्षराणाम् अवगमनार्थं पठनार्थं लेखनार्थं च अस्य कौशलस्य उपयोगं कर्तुं शक्नुवन्ति ।
- संस्कृतस्य अक्षराणाम् अवगमनार्थं भाषा-क्रीडानाम् आयोजनं कर्तुं शक्यते । उदाहरणार्थम् – संस्कृतस्य केनचित् निर्दिष्ट-अक्षरेण शब्दनिर्माणम्, कस्यचित् शब्दस्य अन्तिम-अक्षरेण अग्रिमशब्दस्य निर्माणम्, शब्दानां पठनम् इत्यादयः । निर्दिष्टमात्रया युक्तस्य शब्दस्य निर्माणम्, पठनं लेखनम् इत्यादि-क्रीडाः अपि कारयितुं शक्यते ।
- संस्कृत-अक्षराणाम् अक्षर-जालं निर्माय तस्मिन् जाले शब्दानाम् अन्वेषणं कर्तुं सूचयतु । एतस्मिन् अक्षर-जाले ज्ञातानाम् अक्षराणां मात्राणां च उपयोगः भवतु ।
- प्रवेशिकायाः अन्ते प्रदत्तां वर्णमालां शिक्षार्थिनः पठनसमये लेखनसमये वा कदापि द्रष्टुं शक्नुवन्ति । पठनार्थं लेखनार्थं च ते वर्णमालायाः प्रयोगं कर्तुं शक्नुवन्ति ।

शिक्षार्थिनाम् अध्यापन-काले ध्यातव्याः विषयाः

- **स्वशिक्षार्थिनः जानन्तु** – अस्माभिः ज्ञातव्यं यत् ते शिक्षार्थिनः सर्वथा पठितुं लेखितुं न शक्नुयुः, अथवा पूर्वमेव किञ्चित् पठितुं जानीयुः, अथवा केवलम् अक्षराणि एव परिचिनुयुः, अथवा केवलं स्वनाम लेखितुं शक्नुयुः । इदमपि स्यात् यत् तेषां सङ्ख्याज्ञानं न स्यात् अथवा ते गणितीयसङ्ख्याः औपचारिकगणनाविधीन् च जानीयुः । तेषां रुचिः, अरुचिः, सुखम्, दुःखम्, परिवारः, चिन्ता, संघर्षाः च ज्ञातव्याः, येन यदा वयं शिक्षण-अधिगमप्रक्रियाम् आरभामहे तदा तेषां जीवनस्य घटनाः मनसि कृत्वा वार्तालापं कर्तुं शक्नुयाम । ते अस्माकं वार्तालापेन प्रोत्साहनं प्राप्य सशक्ततां अनुभवेयुः । अस्माकम् आत्मीयता तेषां जीवनस्य अनेकेभ्यः दुःखदायकेभ्यः पक्षेभ्यः तेषां ध्यानं विचालयितुं शक्नुयात् ।
- **शिक्षण-अधिगम-क्रिया मनोरञ्जनात्मिका भवेत् -** भवन्तं / भवतीं परितः बहूनि वस्तूनि भविष्यन्ति यानि पाठस्य अध्यापनार्थम् उपयोगीनि भवितुम् अर्हन्ति । पाठनसम्बद्धानाम् उपलब्धानां सामग्रीणां यथा - वार्तापत्रम्, पत्रिका, विज्ञापनम्, विद्युद्-व्यय-पत्रकम्, रेलयानस्य चिटिका च इत्यादीनां समुचितरूपेण उपयोगं कुर्वन्तु ।
- **शिक्षार्थिभ्यः स्वविचारान् प्रकटयितुम् अवसराः कल्पनीयाः** – शिक्षण-काले स्वयमेव अधिकं न वक्तव्यम्, अपितु शिक्षार्थिभ्यः चर्चां कर्तुं स्वविचारान् प्रकटयितुं च पर्याप्ताः अवसराः प्रदातव्याः । एतत् भवितुमर्हति यत् वयं बहु-सूचनां दातुम् इच्छामः, परन्तु अस्माभिः स्मर्तव्यं यत् अस्माकं शिक्षार्थिनः पूर्वमेव बहु किमपि जानन्ति, अतः तेषां ज्ञानस्य अनुभवानां च लाभं स्वीकर्तुं शक्नुमः । तदर्थं तेषां धन्यवादज्ञापनं न विस्मरणीयम् ।
- **अतिरिक्त-पठन-सामग्रीणां प्रयोगं कुर्वन्तु** – उल्लास-प्रवेशिकायाः प्रत्येकं पाठं पठित्वा तत्सम्बद्धानां विभिन्नप्रकारकाणां सार्थक-पठन-सामग्रीणां सङ्ग्रहणं कुर्वन्तु, एषा सामग्री रुचिकरी भवेत् एवञ्च समीपे एव उपलब्धा भवेत् । अनेन पठितस्य पाठस्य अवगमनं सौकर्याय भविष्यति, शिक्षार्थिनः तया सह सम्बद्धाः भवितुम् अर्हन्ति ।
- **शिक्षार्थिनः प्रति संवेदनशीलः सकारात्मकः च दृष्टिकोणः भवेत्** – यदि वयं वयसा कनिष्ठाः स्मः, ते ज्येष्ठाः सन्ति, तर्हि ते अस्माकं कथनं गभीरतया न शृण्वन्ति इति न चिन्तनीयम् । ते, भवतः बहु सम्माननं प्रेम च करिष्यन्ति, यतो हि वयं तेषां पठनं, लेखनं, सङ्ख्यां च शिक्षितुं साहाय्यं कुर्मः । भवान् अतीव बुद्धिमान्, अनुभवी, संवेदनशीलः च अस्ति, तथापि तेषां कार्ये, वेषभूषायाम्, उच्चारणे, शिष्टाचारे वा किमपि नकारात्मकं कथनं न कथनीयमिति ।
- **शिक्षार्थिनां सौकर्यं मनसि धारयन्तु** – शिक्षार्थिनाम् अनुसारेण शिक्षण-अध्ययनयोः समयः, स्थानं, सीमा इत्यादीन् निर्धारयन्तु । शिक्षार्थिनां कृते उपवेशनस्य व्यवस्था एतादृशी भवेत् येन ते सुखपूर्वकम् उपवेष्टुं शक्नुयुः, एवञ्च यदा वयं तान् अक्षराणां शब्दानां च उच्चारणं कृत्वा दर्शयामः तदा ते सहजतया द्रष्टुं शक्नुयुः । कटाः आसन्दाः इत्यादीनां व्यवस्था पूर्वमेव करणीया येन वयोवृद्धानां येषां जानुवेदना स्यात् तेषां कृते एकहोरां होराद्वयं वा उपवेशने असौकर्यं न भवेत् ।

- **आधार-भूतानाम् आवश्यकतानां व्यवस्था** – यत्र वयं शिक्षार्थिनः पाठयामः तत्र जलस्य व्यवस्था भवेत्। पर्याप्तरूपेण प्रकाशः च भवेत् येन तेषां नेत्रयोः पीडा न भवेत्।
- **शिक्षार्थिनाम् अनुभवस्य कौशलस्य च सम्माननं कुर्वन्तु** – अस्माकं शिक्षार्थिनः जीवनानुभविनः सन्ति। यदि भवान् पठने लेखने शिक्षणे च एतेषाम् अनुभवानां पूर्णं लाभं प्राप्नुयात् तर्हि भवतः कृते पठनं लेखनं शिक्षणं च सुकरं भविष्यति। अस्माकं शिक्षार्थिनः कर्मकराः सन्ति, ते विभिन्नप्रकारकं कौशलं जानीयुः। तेषां कार्यसम्बद्धस्य शब्दकोशस्य, गणितीय-कौशलस्य च पठन-लेखन-शिक्षणे सदुपयोगः कर्तुं शक्यते। पठनलेखनयोः दृष्ट्या भवतः / भवत्याः अवगमनम् अधिकम् अस्ति, परन्तु कार्यस्य जीवनस्य च अनुभवः तेषाम् अधिकं भवेत्। भवान् / भवती तान् आदरपूर्वकं सम्बोधयिष्यति, तेषां वयसः अनुभवानां च पूर्णं सम्माननं करिष्यतीति अपेक्षा।
- **शिक्षार्थिनाम् अधिगम-प्रक्रियां जानन्तु** – भवितुमर्हति यत् अद्य भवता यत् पाठितं तत् ते द्वित्रदिनानाम् अनन्तरं विस्मरेयुः। एतत् अतीव स्वाभाविकम् अस्ति। अतः यत् पूर्वं ज्ञातं तत् पुनः पुनः अभ्यासं कर्तुं तेषां प्रोत्साहनं करणीयम्। प्रत्येकं शिक्षार्थिनः गतिः शिक्षणस्य पद्धतिः च भिन्ना भविष्यति, एतत् मनसि निधाय तेषां स्वगत्या पद्धत्या च शिक्षणं कर्तुं साहाय्यं कुर्वन्तु। शिक्षणे परिवर्तने च कश्चन कालः अपेक्षितः भवति एव अतः धैर्यं धारयन्तु। केन्द्रस्य वातावरणं रुचिकरं कर्तुं मध्ये मध्ये मनोरञ्जनार्थं क्रीडादीनाम् आयोजनं कुर्वन्तु। उत्सवानुसारं गीतानि च गायन्तु। गीतैः, कथाभिः अनुभवेन च वयं शिक्षणाधिगमप्रक्रियायै पाठ्यबिन्दून् संयोजयितुं शक्नुमः। एतेन शिक्षणाधिगमप्रक्रियां रुचिकरं कर्तुं शक्नुमः। शिक्षणार्थं प्रेरणादायकम् आनन्ददायकं च वातावरणम् अत्यावश्यकम् अस्ति।

आधारभूतविषयाणां सङ्ख्यायाः च शिक्षणाधिगमप्रक्रियायाः विषये भवतः / भवत्याः परामर्शानां स्वागतम् अस्ति।

शुभकामनाः

उषा शर्मा
आचार्या प्रभारिणी च
राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः
रा.शै.अ.प्र.प., नवदेहली

निर्माण-समितिः

अध्यक्षः

दिनेश प्रसाद सकलानी, निदेशकः, रा.शै.अ.प्र.प. नवदेहली

परामर्शः

चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली
प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
अनूप कुमार राजपूत, आचार्यः (प्रोफेसर) एवम् अध्यक्षः, प्रकाशनप्रभागः, रा.शै.अ.प्र.प. नवदेहली
रंजना अरोड़ा, आचार्या (प्रोफेसर) एवम् अध्यक्षा, पाठ्यचर्या अध्ययनविभागः, रा.शै.अ.प्र.प. नवदेहली
संध्या सिंह, आचार्या (प्रोफेसर) एवम् अध्यक्षा, भाषाशिक्षाविभागः, रा.शै.अ.प्र.प. नवदेहली
श्रीधर श्रीवास्तव, संयुक्तनिदेशकः, रा.शै.अ.प्र.प. नवदेहली

निर्माण-समितिः

डॉ.मनमोहन शर्मा, शोधाध्येता, संयोजकः 'उल्लासः प्रवेशिका' (संस्कृतम्) संस्कृतसंवर्धनप्रतिष्ठानम्
प्रदीप पौडेल, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
गानमूर्ति, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.श्रीधर, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
खगेन्द्र दहाल, वरिष्ठशोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
राम शर्मा, शोधाध्येता संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
प्रवीण न्यौपाने, शोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
उमेश कुमार पाण्डेय, अनुवादकः संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
नरेन्द्र शर्मा, अनुवादकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
जया टंडन, अनुवादिका, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
सुनील कुमार शर्मा, परियोजना-सहायकः भारतीयज्ञानपरम्परा, नवदेहली

समीक्षा-समितिः

प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.जितेन्द्र मोहन शर्मा, आचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.देवकीनन्दन, सहायकाचार्यः, रा.शै.अ.प्र.प. नवदेहली
डॉ.नितिन कुमार जैन, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
डॉ.परमेश कुमार शर्मा, सहायकाचार्यः, केन्द्रीयसंस्कृतविश्वविद्यालयः, नवदेहली
लक्ष्मीनरसिंहन्, कार्यपालकाधिकारी, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली
डॉ.मनमोहन शर्मा, वरिष्ठशोधाध्येता, संस्कृतसंवर्धनप्रतिष्ठानम्

समन्वयन-सदस्या

उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

कृतज्ञता

अस्मिन् पुस्तके येषां साहित्यरचनाः स्वीकृताः परिषद् तेषां सर्वेषां विदुषां कृतज्ञतां प्रकटयति । रचनानां प्रकाशनाय अनुमतिं प्रदत्तवन्तं भोपाल-नगरस्य 'एकतारा' इति संस्थायाः निदेशकं सुशीलशुक्लं, (दीपावल्याः प्रदीप्ताः दीपकाः); भोपाल-नगरस्य, लोक-चित्रकारं सुभाषव्यामं दुर्गाबाईव्यामं च, (जलवाहिनी), स्वर्गवासिनं निरङ्कारदेवसेवकं (समयस्य अनुपालनम्), श्यामसुशीलं (वर्णगीतम्), प्रभातम् (ज्ञानुः ज्ञानी ज्ञानं तथा च सेव्यतां संस्कृतम्), निशातफ़ारूकम् (सहायता तु प्राप्ता किन्तु कथं एवञ्च मम लेखा मम प्रतिष्ठा), लोक-कथा-निमन्त्रणम्, (अनुपम कहानियाँ) (सेवानिवृत्तम्) कार्यकारि-निदेशकं (रेलवेबोर्ड) प्रेमपालशर्माणम् (गान्धिनः आत्मकथायाः), अजमेर-नगरस्य क्षेत्रीय-शिक्षा-संस्थानस्य शिक्षा-विभागस्य अध्यक्षम् आयुष्मान्-गोस्वामिनं (कथाः) च प्रति परिषद् कार्तज्ञ्यं प्रकटयति ।

पुस्तके चित्राङ्कनाय इयं परिषद् नव-देहलीनगरस्य शशि-शेट्ये-वर्यं; राजस्थान-राज्यस्य जयपुर-नगरस्य लोकचित्रकारिकां (माण्डना शैली) सुनीतां; मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) सुभाष-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारिकां (गोंड-भित्ति-शैली) दुर्गाबाई-व्यामं, मध्य-प्रदेशस्य भोपाल-नगरस्य लोक-चित्रकारं (गोंड-भित्ति-शैली) मानसिंह-व्यामं, राजस्थान-राज्यस्य उदयपुर-नगरस्य प्रशान्त-सोनीं, उत्तर-प्रदेशस्य नोएडा-नगरस्य सागर-अरणकल्ले-वर्यं, मध्य-प्रदेशस्य चंदेरी-नगरस्य शुभम-लखेरां, मध्य-प्रदेशस्य ग्वालियर-नगरस्य हबीब-अलीं, मध्य-प्रदेशस्य देवास-नगरस्य जितेन्द्र-चौरसियां, मध्य-प्रदेशस्य धार-नगरस्य हरिओम पाटीदारं, नीलेश-गहलोतं, नव-देहलीनगरस्य तापोशी-घोषालं, नव-देहलीनगरस्य रुचिन-सोनीं, पश्चिम-बङ्गाल-राज्यस्य कोलकाता-नगरस्य मयूख-घोषं, बिहार-राज्यस्य मधुबनी-नगरस्य सच्चिदानन्द-झां, ओडिशा-राज्यस्य भुवनेश्वर-नगरस्य राधाश्याम राउतं बिहार-राज्यस्य मधुबनी-नगरस्य श्रेयसी-दत्तं प्रति च विशिष्टां कृतज्ञतां विज्ञापयति ।

परिषदा भारतीय-निर्वाचन-आयोगस्य, राष्ट्रिय-मतदातृ-सेवा-सञ्जालस्य, भारतीय-कृषि-अनुसन्धान-केन्द्रस्य, सामाजिक-न्याय-अधिकारिता-मन्त्रालयस्य, प्रधानमन्त्रि-जन-धन-योजनायाः, राष्ट्रिय-आपत्-प्रबन्धन-प्राधिकरणस्य, राष्ट्रिय-साक्षरता-मिशन-प्राधिकरणस्य, मध्य-प्रदेशस्य इन्दौर-नगरस्य राज्य-संसाधन-केन्द्रस्य च कृतज्ञता मन्यते यस्य जालपुटात् प्रवेशिकायाः निर्माणार्थम् उपयोगिन्यः सामग्र्यः चित्राणि च स्वीकृतानि ।

परिषद् प्रवेशिकायाः विकासाय विभिन्न-चरणेषु सहयोगाय राष्ट्रिय-साक्षरता-केन्द्र-प्रकोष्ठस्य परामर्शदातारं अमनगुप्ता-महोदयं प्रति एवञ्च नवदेहलीस्थितस्य संस्कृतसंवर्धनप्रतिष्ठानस्य परियोजना-अधिकारिणं शंकरलाल-सोनी-वर्यं, पुस्तकस्वरूपं (Indigene work) प्रदत्तवतः रीता-विनोद-पङ्कज-इत्येतान् (मुक्तकर्मिणः) प्रति एवञ्च ग्राफिक-विन्यासकारिके सोनम-मितालयौ प्रति च कृतज्ञतां प्रकटयति । एतेषां/एतासां महता सहयोगेन इदं कार्यं निर्विघ्नतया सुसम्पादितम् ।

यदि भवान्/भवती.....



पठनम् एवं परीक्षाम् आश्रित्य



वैयक्तिक-सम्बन्धान् आश्रित्य



आजीविकाम् आश्रित्य



मित्राणां दुर्व्यवहारेण च

पीडितः/पीडिता, चिन्तितः/चिन्तिता वर्तते तर्हि परामर्शकस्य सहायतां स्वीकरोतु।



राष्ट्रिया निश्शुल्क-परामर्श-दूरभाष-संख्या
प्रातः ८ वादनतः रात्रौ ८ वादन-पर्यन्तम्
प्रतिदिनम्।

मनोदर्पणम्

कोविड-१९ इत्यस्य प्रकोप-काले तत्पश्चादपि विद्यार्थिनां मानसिक-स्वास्थ्य-लाभार्थम्
एवं कल्यार्थं मनोसामाजिक-सहायता
(आत्मनिर्भर-भारत-अभियानस्य अन्तर्गतः, शिक्षा मन्त्रालयः, भारत-सर्वकारस्य एकः उपक्रमः)

www.https://manodarpan.education.gov.in

विषयसूची

आमुखम् *iii*

स्वयंसेवी शिक्षकों से दो बातें *v*

८. विभिन्नाः आपदाः **२५३–२६४**

- भूमिः यदा कम्पिता
- धारितायाः मापनम् (मि.ली. परिमितं, लीटर परिमितम्)
- गुणन-विभजनद्वारा दैनिकसमस्यानां समाधानम्

९. समयः एव करोति बलाबलम् **२६५–२८४**

- निमन्त्रणम्
- भवति लोके सर्वं समयानुसारम्
- द्वयोः अङ्कीय-संख्ययोः गुणनम्
- समयस्य मापनम् (होरा, निमेषः,पलम्)

१०. यात्रा **२८५–३०३**

- गान्धिनः आत्मकथायाः...
- यात्रा
- समयमापनस्य उपयोगः कथं करणीयः (१२ एवं च २४ होरात्मिका घटिका)
- दिनदर्शिकायां, समय-सारिण्यां रेल-चिटिकायां च दत्तानां सूचनानाम् अवगमनम्।

मम पुस्तकम्

नाम - _____

पत्र-सङ्केतः - _____

_____

चल-दूरवाणी-सङ्ख्या - _____



वार्तालापाय

सामान्यतया वयम् अवगच्छामः यत् **'आपदा'** इति अत्यन्तं कष्टदायिनी स्थितिः भवति, या अकस्मात् एव आगच्छति। प्रदत्तेषु चित्रेषु कीदृश्यः आपदाः दर्शिताः ? किं भवान्/भवती कदापि एतादृशीः आपदाः अनुभूतवान्/अनुभूतवती ?



८ विभिन्नाः आपदाः

वयं ज्ञास्यामः

- धारितायाः मापनम् (मि.ली. परिमितं, लीटर परिमितम्)
- गुणन-विभजनद्वारा दैनिकसमस्यानां समाधानम्

वयं दृष्ट्वा पठामः -



दावानलः



प्लावनम्




भूकम्पः



रेल-दुर्घटना



रोगि-वाहनम्



अग्निशामक-वाहनम्



विद्रावः



सहायता-शिविरम्

शिक्षक-निर्देशः - चित्राणाम् अधः लिखितान् शब्दान् अङ्गुलिनिर्देशद्वारा शिक्षकः सहभागिनः पाठयेत्, अपि च पठितुं प्रेरयेत्। सर्वेऽपि विभिन्नानाम् आपदानां विषये परस्परं चर्चां कुर्युः, स्व-अनुभवान् च वदेयुः।

मिलित्वा पठामः-

भूमिः यदा कम्पिता

यदा अहं गणतन्त्रदिवसस्य कार्यक्रमे व्यस्तः आसम्, तदा अकस्मात् एव भूमेः कम्पनम् आरब्धम्। सर्वे जनाः कोलाहलपूर्वकम् इतस्ततः धावितुम् आरब्धवन्तः। सर्वे अपि अतीव भयभीताः आसन्। क्षणेन एव अनेकानि अपि भवनानि पतितानि। सर्वेषां सम्पूर्ण-वस्तूनि नष्टानि।





बहूनां जनानां शारीरिक-अङ्गानि क्षत-विक्षितानि। अस्याः घटनायाः सञ्चारमाध्यमेन प्रचारः जातः। एतां घटनाम् अवगत्य सहायतार्थम् अनेके जनाः शीघ्रमेव तत्र आगतवन्तः। ते पीडितजनानां स्थितिम् अवगत्य तत्र कार्यं कर्तुम् आरब्धवन्तः। पीडितजनानां कृते भोजनवासादीनां व्यवस्थाम् अपि कृतवन्तः।

ग्रामीणाः जनाः अपि तेषां सहायकानां सहयोगार्थम् आगतवन्तः । एषा गुजरातप्रदेशस्य भुजनगरस्य घटना आसीत् । तस्मिन् काले बहुशैत्यम् आसीत् ।



बहिः गन्तुम् अपि न शक्यते स्म । भूकम्पस्य आशङ्कया, कदा पुनः भूकम्पः भवेत्, इति चिन्तनेन निद्रा अपि न आयाति स्म ।



एवमेव अनेकानि दिनानि व्यतीतानि । पुनः शनैः शनैः जनाः स्वस्थाः जायमानाः आसन् । अनन्तरं केचन अभियन्तारः (इंजीनियर) तत्र आगत्य गृहनिर्माणविषये बोधितवन्तः, कथं गृह-निर्माणं कुर्मः येन भूकम्पेन न्यूना हानिः भवेत् इति । तदा सर्वे अपि तेषां कथनानुसारेण भूकम्परोधीनि गृहाणि निर्मितवन्तः । कतिपयवर्षानन्तरं सम्पूर्णः ग्रामः पूर्ववत् सुन्दरः अभवत् ।



स्रोतः – आसपास कक्षा ५, रा.शै. अ. प्र. प.

शिक्षक-निर्देशः – शिक्षकः यदा एतं पाठं पाठयेत् तदा भुजनगरस्य भूकम्पविषये सहभागिनः बोधयेत् । भूकम्पात् जायमानानां प्रभावाणां विषये अपि चर्चां कर्तुं प्रेरयेत् । शिक्षकः सहभागिनः पृच्छेत् यद् ते कदापि भूकम्पस्य अनुभवं कृतवन्तः न वा इति । यदि कृतवन्तः तर्हि कीदृशीः समस्याः अनुभूतवन्तः ? प्राणिसम्पत्ति-आदीनां कियती हानिः इति ?

■ चिन्तयित्वा वदन्तु –

प्रश्नः १. भूकम्पकाले यदा जनानां गृहाणि नष्टानि, तदा तेषां कृते कीदृश्याः सहायतायाः आवश्यकता भवेत् ?

प्रश्नः २. विचारयन्तु, यदि भवतः/भवत्याः नगरे कदाचित् भूकम्पः आगच्छेत्, तेन भवतः/भवत्याः गृहम् अपि नष्टं भवेत्, तर्हि भवान्/भवती कुत्र स्थास्यति ?

प्रश्नः ३. भवन्तः भूकम्पकाले स्वगृहे पालितानां पशूनां रक्षणं कथं करिष्यन्ति ?

प्रश्नः ४. किं भवान्/भवती कदापि अनावृष्टिः, भूकम्पः प्लावनं च इत्येतासु काम् अपि प्राकृतिकीम् आपदाम् अनुभूतवान्/अनुभूतवती ? तर्हि स्व-अनुभवान् श्रावयतु।

प्रश्नः ५. प्राकृतिक-आपदानां विषये मनुष्येण प्रकृत्या सह कृतः दुर्व्यवहारः एव दोषी वर्तते इति अस्मिन् विषये भवन्तः किं चिन्तयन्ति ? एतादृश्याः कस्याः अपि एकस्याः आपदायाः सन्दर्भे स्वमित्रैः सह चर्चां कुर्युः। चर्चायां निष्कर्षरूपेण प्राप्तान् मुख्यबिन्दून् लिखन्तु।

■ भूकम्पात् रक्षितुं के के उपायाः सन्ति ?

१. यदि भवान्/भवती गृहस्य अन्तः अस्ति तर्हि

- खट्वायाः अथवा सुदृढ-उत्पीठिकायाः अधः तिष्ठेत्।
- यदि खट्वा-उत्पीठिकादयः न स्युः, तर्हि स्वस्य शिरः बाहुभ्याम् आच्छादयेत्।
- काच-वातायन-द्वारेभ्यः दूरम् एव तिष्ठेत्।

२. यदि भवान्/भवती गृहस्य बहिः अस्ति तर्हि

- उन्नतभवनेभ्यः वृक्षेभ्यः मार्गदीपेभ्यः विद्युत्-तन्त्रीभ्यः च दूरम् एव तिष्ठेत्।


३. यदि भवान्/भवती चलति वाहने अस्ति तर्हि

- यावत् शक्यं यानं स्थगयित्वा यानस्य अन्तः एव तिष्ठेत्।

४. यदि भवान्/भवती भूकम्पेन पातिनानां गृहाणाम् अन्तः अस्ति तर्हि

- अग्निं न ज्वालयेत्।

- स्वमुखं वस्त्रेण आच्छादयेत्।
- समीपस्थां नलिकां भित्तिं वा ताडयेत्, येन भवन्तम् अन्वेष्टुं सारल्यं स्यात्।



भूकम्पकाले कस्यचित् सुदृढवस्तुनः अधः स्थातुं किमर्थं वदन्ति ?

आपदायाः समये सम्पर्क-सूचना

यदि काचित् आपदा आगच्छति तर्हि तस्याः सहायतायै समीपस्थस्य आरक्षकालयस्य, अग्निशामककेन्द्रस्य चिकित्सालयस्य च पत्रसङ्केतं दूरवाणी-संख्यां च अन्विष्य लिखेत् स्मरेत् च।

	पत्रसङ्केतः	दूरभाषा-संख्याः
अग्निशामककेन्द्रः		
समीपस्थः चिकित्सालयः		
रोगि-वाहनम्		
आरक्षकालयः		

मम शब्दाः


शिक्षक-निर्देशः – 'विभिन्नाः आपदाः' इति विषयम् आश्रित्य सहभागिनः परस्परं चर्चां कुर्युः । शिक्षकः सहभागिनः पृष्ट्वा एतद्-विषयसम्बद्धान् त्रि-चतुर्-शब्दान् लेखितुं प्रेरयेत् । एते शब्दाः तेषां मातृभाषायाः अपि स्युः । यथा – भूकम्पार्थम् – भू-डोल इत्यादयः । सहभागिनः याः आपदाः अनुभूतवन्तः, तद्विषये ते चित्राणाम् अथवा भित्तिपत्राणां निर्माणं कुर्युः ।

सहायता

- सर्वकारेण भूकम्पपीडितानां कृते सहायता-शिविरे भोजनस्य व्यवस्था कृता । तत्र एकः पाचकः पञ्चविंशतेः जनानां भोजनं पचति । यदि सहायता-शिविरे चत्वारः पाचकाः स्युः, तर्हि ते कतीनां जनानां कृते भोजनं पचेयुः ?
- भूकम्पकाले एकस्मिन् रोगि-वाहने पञ्चानां जनानाम् उपवेशन-व्यवस्था भवति । पञ्चाशत् जनानां कृते कति-वाहनानाम् आवश्यकता भविष्यति ?

धारितायाः मापनम्

पीडितेभ्यः भोजन-जलकूपी-दुग्धादीनां वितरणम् अपि कृतम् । जलकूप्यः विभिन्नेषु आकारेषु आसन् । काचन लघ्वी, काचन दीर्घा, काचन दीर्घतरा । तासु कति-लीटरपरिमितं जलम् आयाति इति तत्र लिखितम् आसीत् ।



१ लीटर | ७५० मि.ली. (पादोनलीटरपरिमितम्) | ५०० मि.ली. (अर्धलीटरपरिमितम्) | २५० मि.ली. (एकपादलीटरपरिमितम्)

(१ लीटर = १००० मि.ली.)


- १ लीटरपरिमितां कूपीं पूरयितुं ५०० मिलीलीटरपरिमितानां कतीनां कूपीनाम् आवश्यकता भविष्यति ?
- २ लीटरपरिमितां कूपीं पूरयितुं २५० मिलीलीटरपरिमितानां कतीनां कूपीनाम् आवश्यकता भविष्यति ?

शिक्षक-निर्देशः – शिक्षकः विभिन्नानाम् आकृतिमतां पात्राणां धारितायाः विषये ज्ञातुं सहभागिनः प्रेरयेत् । कक्षायां तान् पृच्छेत् यत् लघु-आकृतिमन्ति दीर्घ-आकृतिमन्ति च पात्राणि कुत्र दृष्टवन्तः इति । मिलीलीटर (मि.ली.) एवं च लीटर (ली.) इति मापनस्य चिह्नम् अस्ति । कस्यचित् पात्रस्य धारिता एतत् सूचयति यत् तस्मिन् पात्रे कियान् द्रवपदार्थः आगच्छति । लघुपात्राणां मिलीलीटरमाध्यमेन एवं च दीर्घपात्राणां लीटरमाध्यमेन मापनं क्रियते । १ लीटर = १००० मि.ली. भवति ।

- सहायताशिविरे चिकित्सकः कस्मैचित् रोगिणे १८० मि.ली. परिमितां युक्ताम् औषधकूपीं दत्तवान्। एवं च सः प्रतिदिनं २० मि.ली. परिमितम् औषधं पातुम् उक्तवान्। रोगी कतीनां दिनानाम् औषधं प्राप्तवान् ?



- प्लावनसमये सङ्क्रामकरोगम् अवरोद्धुं कश्चित् चिकित्सागणः टीकाकरणार्थं ग्रामः प्राप्तः। चिकित्सागण १०० मि.लीटरपरिमितां १० औषधकूपीं नीत्वा गतवान्। टीकाकरणे एकस्य जनस्य कृते ५ मि.लीटरपरिमितायाः कूप्याः आवश्यकता भवति। १ लीटरपरिमित-औषधकूप्या कतीनां जनानां टीकाकरणं भविष्यति ?



वार्तालापाय

एतेषु विषयेषु परस्परं चर्चां कुर्वन्तु

१. भवन्तः समयस्य विषये किमपि वदन्तु। सुखस्य समयः अथवा दुःखस्य समयः।

२. 'कोरोना' काले भवान्/भवती कस्यापि सहायतां कृतवान्/कृतवती ?

३. भवान्/भवती कोरोनाकाले आगताभिः समस्याभिः किं ज्ञातवान्/ज्ञातवती ?

४. मुख-आवरकस्य का आवश्यकता आसीत् ?

५. हेण्ड-सेनेटाइजर इत्यस्य महत्त्वं किम् आसीत् ?





९ समयः एव करोति बलाबलम्

वयं ज्ञास्यामः

- द्वयोः अङ्कीय-संख्ययोः गुणनम्
- समयस्य मापनम् (होरा, निमेषः,पलम्)
- समयमापनस्य उपयोगम् (१२ एवं च २४ होरात्मिका घटिका)

अधः लिखितान् शब्दान् पठामः -

समयः	दिनम्	कालः	युगम्
घटिका	वर्षम्	मासः	पक्षः
सप्ताहः	तिथिः	दिनदर्शिका	प्रातः
सायम्	रात्रिः	मध्याह्नः	अपराह्णः

शिक्षकनिर्देशः - सहभागिनः समय-सम्बद्धान् शब्दान् आश्रित्य परस्परं चर्चां कुर्युः । एतेन सम्बद्धान् कथाः सूक्तीः च अन्वेष्टुम् अपि प्रयासं कुर्युः ।

■ मिलित्वा पठामः एवं च वार्तालापं कुर्मः ।

निमन्त्रणम्

एकस्मिन् ग्रामे एकः श्रेष्ठी निवसति स्म । तस्य एकः पुत्रः आसीत् । यदा सः वयस्कः अभवत् तदा श्रेष्ठी तस्य विवाहस्य आयोजनं कृतवान् । विवाहस्य तिथिः निश्चिता जाता । श्रेष्ठी ग्रामस्य सर्वान् प्रतिष्ठितान् जनान् परिजनान् च आहूतवान् । श्रेष्ठिनः एका भगिनी अपि आसीत् । विवाहस्य द्वि-वर्षानन्तरं व्यापारे हानेः कारणात् सा निर्धना जाता । श्रेष्ठी तस्याः निर्धनतां विचार्य लज्जाम् अनुभवति स्म । अतः सः विवाहे आगमनाय भगिन्यै आवुत्ताय च निमन्त्रणम् अपि न दत्तवान् ।

यदा श्रेष्ठिनः भगिनी विवाहस्य विषये ज्ञातवती तदा तया चिन्तितम् यत् भ्राता निमन्त्रणविषये स्वभगिनीम् अपि विस्मृतवान् । "अयं तु कुटुम्बस्य हर्षस्य उत्सवः अस्ति । मया तु तत्र अवश्यं गन्तव्यम् एव" इति विचार्य सा तस्मिन् शुभावसरे प्रातःकाले एव भ्रातुः गृहं प्राप्तवती ।

किन्तु भ्राता भगिनीं दृष्ट्वा किञ्चित् अपि प्रसन्नतां न प्रकटितवान् । श्रेष्ठी भगिन्या सह वार्ताम् अपि न कृतवान् ।

भ्रातुः एतादृशेन व्यवहारेण सा भगिनी तस्य मनसः भावान् अवगतवती । विवाह-समारोहे सम्पन्ने जाते तस्मिन्नेव दिने सा स्वगृहं प्रत्यागतवती ।

व्यापारे लाभकारणेन षण्मासानन्तरं भगिन्याः भाग्योदयः पुनः जातः । तस्याः पत्युः कार्यं सम्यक् रूपेण आरब्धम् । शनैः शनैः भगिन्याः कुटुम्बः समृद्धः अभवत् ।

किञ्चित् कालानन्तरं श्रेष्ठिनः पुत्रवधूः गर्भवती जाता । गर्भस्य षष्ठे मासे सीमन्तोन्नयन-संस्कारः अभवत् । अस्मिन् अवसरे श्रेष्ठी प्रतिष्ठितजनैः परिजनैः सह स्वभगिन्यै अपि निमन्त्रणं दत्तवान् ।

वस्त्रैः आभूषणैः च अलङ्कृतौ सन्तौ आवुत्तः (भगिनीपतिः) भगिनी च सुविशिष्टेन अश्वशकटेन अर्धहोरा-पूर्वमेव कार्यक्रमं प्राप्तवन्तौ। श्रेष्ठी तयोः बहुसम्मानं कृतवान्।

संस्कारस्य अन्ते सायङ्काले भोजनस्य समयः अभवत्। भगिनी तस्याः पतिः च भोजनाय उपविष्टवन्तौ। तस्मिन् एव काले भगिनी स्वस्य सर्वाणि आभूषणानि अवतार्य भोजनस्य स्थाल्याः समीपे स्थापितवती। भगिन्याः एतादृशं व्यवहारं दृष्ट्वा श्रेष्ठी भगिनीं पृष्टवान् "भगिनि ! किमर्थं त्वं स्वस्य आभूषणानि स्थाल्याः समीपे स्थापितवती ?"

भगिनी प्रत्युत्तरं दत्तवती– "भ्रातः ! भवान् तु एतेषाम् आभूषणानां कृते निमन्त्रणं दत्तवान्, न तु मम कृते। अतः इदानीम् एतानि आभूषणानि एव भोजनं करिष्यन्ति। एतत् तु धनस्य सम्मानस्य युगम् अस्ति"।



श्रेष्ठी स्वस्य पुत्रस्य विवाहस्य काले भगिन्याः यम् अनादरं कृतवान् आसीत्, तम् अनादरं स्मृत्वा पश्चात्तापम् अपि कृतवान्। अनन्तरं भगिनीं तस्याः पतिं च प्रति क्षमा-याचनाम् अपि कृतवान्।

तदा द्वयोः नेत्राभ्यां प्रसन्नतायाः अश्रूणि पतितानि। अनन्तरं सर्वेऽपि मिलित्वा समारोहस्य आनन्दं प्राप्तवन्तः।

(स्रोत - अनुपम कहानियाँ)

वार्तालापं कुर्मः -

प्रश्नः१. धनस्य कुटुम्बस्य च मध्ये कस्य महत्त्वम् अधिकम् अस्ति ? कारण-सहितं चर्चां कुर्वन्तु ।

प्रश्नः२. विवाहे काः काः परम्पराः सन्ति यासां पूर्वं तु प्रचलनम् आसीत्, परन्तु सम्प्रति न ? किमर्थं च ?

प्रश्नः३. निर्धनतायाः कारणेन श्रेष्ठी भगिनीं स्वपुत्रस्य विवाहे न आहूतवान् । किम् अद्यत्वे अपि धनकारणेन समाजे पृथग्व्यवहारः दृश्यते ? किमर्थं च ?

प्रश्नः४. केचन समृद्ध-जनाः स्वनिर्धन-परिजनैः सह व्यवहारं न कुर्वन्ति, अस्मिन् विषये भवतां के विचाराः सन्ति ?

प्रश्नः५. समाजे सम्मानस्य मानदण्डरूपेण किम् अस्ति धनं ज्ञानं सौम्य-व्यवहारः वा ? स्वविचारान् वदन्तु ।


स्वरुचेः कार्यस्य विषये वदन्तु लिखन्तु च ।



भवति लोके सर्वं समयानुसारम्

जगत् प्रकाशयति सूर्यः सदैव,
चन्द्रः आगच्छति रात्रौ एव।
धरा पालयति समयं तथैव,
भवेत् समयानुपालनम् एवमेव ॥

सरितः वहन्ति परोपकाराय,
समुद्रं प्रति गच्छन्ति मेलनाय।
सर्वं कुर्वन्ति नियम-पालनाय,
वयमपि कुर्याम समयानुपालनाय ॥



फलन्ति वृक्षाः समयानुसारम्,
वर्षन्ति मेघाः अनुसृत्य ऋतुकालम् ।
वहति वायुः भूमेः गत्यनुसारम्,
भवति लोके सर्वं समयानुसारम् ॥

उत्तिष्ठन्तु जाग्रतु जीवनं नियमयन्तु,
पठन्तु लिखन्तु विद्याम् अर्जयन्तु।
सुखेन जीवन्तु ज्ञानं वर्धयन्तु,
समयस्य अनुपालनं प्रवर्तयन्तु ॥

— निरंकारदेवः सेवकः
(अनुवादिका-जयाटण्डनः)

प्रश्नः १. उदाहरणानुसारं वाक्यानि रचयन्तु।

समयः	परिश्रमेण सर्वदा समयः अनुकूलः भवति।
रात्रिः	
युगम्	
सप्ताहः	
दिवसः	

प्रश्न २. अधो लिखिते गीते नियमपूर्वकेण कार्य-सम्पादनस्य महत्त्वं प्रतिपादितम् अस्ति -

उत्तिष्ठन्तु जाग्रतु जीवनं नियमयन्तु,
पठन्तु लिखन्तु विद्याम् अर्जयन्तु।

भवन्तः/भवत्यः कानि कानि कार्याणि नियमपूर्वकेण कुर्वन्ति, कानि कानि च न ? कारणसहितं लिखन्तु -

_____

_____

_____

प्रश्नः ३. किमपि एकं कार्यं यत् भवान्/भवती अधो-लिखिते समये कर्तुम् इच्छति-

अद्य	
श्वः	
अस्मिन् सप्ताहे	
अस्मिन् मासे	
अस्मिन् वर्षे	

मम शब्दाः

अस्माकं वार्तालापे समयः कदा एवं च कुत्र आगच्छति, तद् अधः पश्यामः -

कालो हि दुरतिक्रमः

काले खलु समारब्धाः फलं बध्नन्ति नीतयः

समयः एव करोति बलाबलम्


कालस्य कुटिला गतिः

कालः समविषमकरः

कालः सर्वं विरोपयति


काव्यशास्त्र-विनोदेन कालो गच्छति धीमताम्।

स्वहस्तयोः अङ्गुलीः गणयन्तु -



द्वयोः हस्तयोः कति अङ्गुल्यः सन्ति २ X ५ = १०

द्वादशसु (१२) हस्तेषु कति अङ्गुल्यः सन्ति ?




१२ हस्तानाम् ५ अर्थात्


१२ × ५ अथवा
१२
× ५

आगच्छन्तु, वयं मिलित्वा समयम् अधिगच्छामः –


सामान्यरूपेण घटिकायां द्वादशपर्यन्तम् (१२) अङ्काः भवन्ति । प्रतिद्वयम् अङ्कयोः मध्ये चतस्रः लघ्व्यः रेखाः भवन्ति।



- सम्पूर्णघटिकायां कति रेखाः भवन्ति ? गणयित्वा लिखन्तु _____ रेखाः।
- घटिकायां द्विविधाः त्रिविधाः च सूचिकाः भ्रमन्ति।



त्रि-सूचिकात्मिका घटिका



द्वि-सूचिकात्मिका घटिका

- होरायाः सूचिका स्थूलतमा लघुतमा च अस्ति । होरायाः सूचिका एक-अङ्कात् द्वितीयम् अङ्कम् एकस्यां होरायां प्राप्नोति। एषा सूचिका द्वादश-होरासु घटिकावृत्तस्य एकं सम्पूर्ण-भ्रमणं करोति तर्हि होरायाः सूचिका चतुर्विंशति-होरायाम् अथवा एकस्मिन् दिने घटिकावृत्तस्य भ्रमणं कतिवारं करोति ? ——————————
- तस्याः कृशतरा दीर्घतरा च सूचिका निमेषस्य अस्ति। निमेषस्य सूचिका एक-अङ्कात् द्वितीयम् अङ्कं पञ्चनिमेषेषु प्राप्नोति । एषा सूचिका षष्टि-निमेषेषु सम्पूर्णस्य घटिकावृत्तस्य एकं भ्रमणं करोति।
- कृशतमा दीर्घतमा च सूचिका क्षण (सेकेण्ड) इत्यस्य अस्ति । एषा सूचिका क्षणं सूचयन्ती सर्वाधिका शीघ्रगामिनी अस्ति।



द्वि-वादनम्



पञ्च-वादनम्

यदा षष्टि-निमेषाणाम् एका होरा भवति तदा तिसृषु होरासु कति निमेषाः भवन्ति ?

३×६० अथवा $\begin{array}{r} ६० \\ \times \quad ३ \\ \hline \end{array}$

कः समयः ? घटिकां पश्यन्तु

यदि निमेषस्य सूचिका द्वादश-अङ्के भवति एवं च होरायाः सूचिका यस्मिन् अङ्के तिष्ठति तर्हि तद् एव वादनं भवति । यथा होरायाः सूचिका अङ्कत्रये भवति निमेषस्य च सूचिका द्वादशे अङ्के भवति तर्हि त्रिवादनम् इति समयः भवति ।





द्वादश-वादनम्



वादनम्



वादनम्



वादनम्



वादनम्



वादनम्



वादनम्



वादनम्

शिक्षक-निर्देशः - शिक्षकः सहभागिनः प्रेरयेत् यत् ते घटिकां दृष्ट्वा समयं वक्तुं शक्नुयुः । एवं च होरा-निमेष-क्षणादीनां पारस्परिकं सम्बन्धम् अवगच्छेयुः ।

अङ्कीयाः घटिकाः

- अङ्कीयासु घटिकासु समयः लिखितः एव वर्तते। रेल-स्थानकेषु, चलदूरवाणी-इत्यादिषु अङ्कीय-घटिकानां प्रयोगः भवति।
- सूच्यताम्, एतासु घटिकासु कः समयः ?





06:40

_____ वादनम्

07:45

_____ वादनम्

12:45

_____ वादनम्

06:20

_____ वादनम्

आगच्छन्तु - पूर्वम् अनुमानद्वारा तत्पश्चात् घटिकायाः प्रयोगद्वारा अवगच्छामः -

- भोजनाय भवतः / भवत्याः कृते कति निमेषाः अपेक्षिताः ? _____ निमेषाः ।
- स्नातुं कति निमेषाः अपेक्षिताः ? _____ निमेषाः ।
- अहं रात्रौ _____ वादने शयनं करोमि, प्रातः च _____ वादने उत्तिष्ठामि । अहं _____ होराः पर्यन्तं शयनं करोमि ।
- ग्रामस्य विद्यालयः _____ वादने आरभ्यते _____ वादने च समाप्यते । विद्यालयः _____ होराः पर्यन्तं प्रचलति ।

शिक्षकनिर्देशः - सूचिका-घटिकायाम् अङ्कीय-घटिकायां च समयं द्रष्टुं वक्तुं च शिक्षकः सहभागिनः प्रेरयेत् ।

कृषकस्य प्रातःकालः

एकः कृषकः प्रातः षड्-वादने  घासकर्तनम् आरब्धवान्। सः कर्तितेन घासेन लघुं वृन्दं रचितवान्। एतादृशान् पञ्च वृन्दान् संयुज्य सः एकं विशालं वृन्दं निर्मितवान्। कृषकः  घासं कर्तयित्वा पञ्चदश-निमेषेभ्यः पश्चात् गृहं प्राप्तवान्। प्रातः षड्-वादनतः सायं सप्तवादन-पर्यन्तं सः घासस्य चतुरः विशालान् घास-वृन्दान् निर्मितवान्।

- सः घासं कर्तयित्वा कति लघु-वृन्दान् निर्मितवान्?

  _____ एवम् अपि _____ × _____ लेखितुं शक्नोति

- सः कदा गृहं प्रत्यागतवान्? प्रातः _____ वादने। एषः समयः  घटिकायां दर्शितः अस्ति।

- कृषकः कदा घासकर्तनम् आरब्धवान्? प्रातः _____ वादने

- कृषकः कदा पर्यन्तं घासकर्तनस्य कार्यं कृतवान्? सायं _____ वादने


- घासकर्तने कृषकः कियन्तं समयं व्यतीतवान्? _____ होरा = _____ निमेषाः

- घासं कर्तितुम् एवञ्च गृहं प्रत्यागन्तुं कृषकेण कियान् समयः व्यतीतः?
  १ होरा + १५ निमेषाः = _____ निमेषाः

शिक्षकनिर्देशः - शिक्षकः दैनिकजीवनस्य कार्येषु निर्धारित-समयस्य उदाहरणानि आश्रित्य परस्परं चर्चां कर्तुं सहभागिनः प्रेरयेत्।

मम शब्दाः


नवदेहली NEW DELHI
प्रस्थान समय
गाड़ी का नाम
12919 मालवा एक्सप्रेस 05:20 5
13007 उद्यान आमा तुफान एक्सप्रेस 05:30 4
12138 पंजाब मेल 05:35 3
12002 भोपाल शताब्दी एक्सप्रेस 06:00 1
12015 अजमेर शताब्दी एक्सप्रेस 06:25
12004 लखनऊ शताब्दी
12876 नीलांचल
12017 देहरादून शता
12555 गोरखधाम
13008 उद्यान आमो
12029 अमृत
519 दिल्ली
नवदेहली
NEW DELHI



वार्तालापाय

१. एतत् चित्रं कस्य रेलस्थानकस्य अस्ति ?

२. स्थगनपीठे (प्लेटफार्म) किं रेलयानम् अस्ति । ?

३. भवतः/भवत्याः गृहात् सर्वाधिकं समीपं किं रेलस्थानकम् अस्ति ? ४. भवतः ग्रामात् अथवा नगरात् ग्वालियर-पर्यन्तं कथं प्राप्तुं शक्नुमः ।

१० यात्रा

वयं ज्ञास्यामः

- समयमापनस्य उपयोगः कथं करणीयः (१२ एवं च २४ होरात्मिका घटिका)
- दिनदर्शिकायां, समय-सारिण्यां रेल-चिटिकायां च दत्तानां सूचनानाम् अवगमनम्।

अधः लिखितान् शब्दान् पठन्तु -


आसनम्	दृश्यम्	चालकः	शीटिका	मृन्मार्गः
प्रत्यागमनम्	रेलयानम्	मार्गः	प्रसाधनम्	यात्रा
राजमार्गः	वृषभशकटम्	भाटकम्	पाथेयम्	द्विचक्रिका
रेल-चिटिका	यात्री	प्रवासी	लोकयान-स्थानकम्	रेल-स्थानकम्
यात्रा-आरक्षणम्	त्रिचक्रिका	शयन-यानम्	रेलयान-प्रबन्धकः	कर्षण-यन्त्रम्
रेल-चिटिका	स्थगन-पीठम्	सञ्चालकः	भारवाहकः	तत्काल-आरक्षणम्


शिक्षकनिर्देशः — उपरि यात्रासम्बद्धाः केचन शब्दाः दत्ताः सन्ति, तान् शब्दान् आश्रित्य परस्परं चर्चां कुर्वन्तु। पुनः कस्याश्चित् स्वयात्रायाः, वृत्तान्तं श्रावयितुं शिक्षकः सहभागिनः प्रेरयेत्। यात्रा-आधारितस्य कस्यचित् नाटकस्य मञ्चनाय अपि प्रोत्साहनं कुर्यात्।

गान्धिनः आत्मकथायाः .....

"गिरमिट्-प्रथा" इत्यस्मिन् अध्याये गान्धि-महोदयः लिखति –

अहम् एकवारं रेलयाने जन-सम्मर्देन असहनीयां पीडाम् अनुभूतवान् । मया लाहौरमार्गेण कराचीनगरतः कलकत्तानगरं गन्तव्यम् आसीत्। लाहौरनगरे रेलयानस्य परिवर्तनम् अपेक्षितम् आसीत्। किन्तु तत्र जन-सम्मर्दस्य कारणात् महती अव्यवस्था आसीत् । यात्रिणः बलपूर्वकं रेलयानस्य अन्तः प्रविशन्ति स्म । यदि द्वारं पिहितम् अस्ति तर्हि यात्रिणः गवाक्षैः अन्तः गच्छन्ति स्म । कलकत्तानगरं गन्तुं तस्मिन् एव दिने अपेक्षितम् आसीत् । यदि इदं रेलयानं त्यक्तं स्यात् तर्हि मम कलकत्तानगरस्य प्राप्तिः असम्भवा आसीत्। रेलयानं प्रवेष्टुं मम आशा समाप्ता । कोऽपि मह्यम् अन्तः प्रवेष्टुं न दत्तवान्।





अन्ततः एकः श्रमिकः माम् उक्तवान् – "यदि भवान् मह्यं पादोनरूप्यकं ददाति तर्हि अहं भवन्तम् अन्तः प्रवेशयामि ।" अहम् उक्तवान् – "भवान् मां रेलयानस्य अन्तः प्रवेशयतु । अहं भवतः कृते पादोन-रूप्यकाणि ददामि ।" श्रमिकः तत्र उपविष्टान् यात्रिणः आर्त्तभावेन प्रार्थितवान् । किन्तु कोऽपि रेलयानस्य अन्तः मम प्रवेशाय सज्जः न आसीत् । रेलयानस्य प्रस्थानस्य समयः जातः । शकटस्य केचन यात्रिणः उक्तवन्तः - "रेलशकटस्य अन्तः प्रवेष्टुं स्थलं न अस्ति । परन्तु अन्तः प्रवेष्टुं कञ्चित् प्रयासं करोतु । तथापि भवान् उपवेष्टुं न शक्नोति ।" श्रमिकः मां पृष्टवान् – "किं भोः?" अहम् उक्तवान् -"आम्!" सः माम् गवाक्षात् अन्तः प्रवेशितवान् । अहम् अन्तः प्रविष्टवान् । सः श्रमिकः पादोनरूप्यकाणि च अर्जितवान् ।

एषा रात्रिः मम कृते बहु-कष्टदायिनी आसीत् । अन्ये यात्रिणः कथञ्चिद् उपविष्टवन्तः । अहं होराद्वयं यावत् उपरिस्थितस्य आसनस्य लौह-शृङ्खलां गृहीत्वा स्थितवान् । मध्ये मध्ये केचन यात्रिणः मां तर्जयन्ति स्म - "अरे भोः ! किमर्थं न उपविशति ?" अहं बहुधा उक्तवान् यत् कुत्रापि स्थलं न अस्ति । किन्तु अहं तिष्ठन् अस्मि इति ते सोढुं न शक्नुवन्ति स्म । ते वारंवारं मां पीडयन्ति स्म । यावत् ते मां पीडितवन्तः तावत् अहं शान्त्या उत्तरं दत्तवान् । तेन ते शान्ताः अभवन् । ते मम नाम स्थानं च पृष्टवन्तः । यदा अहं मम नाम उक्तवान्, तदा ते लज्जिताः जाताः । ते यात्रिणः क्षमायाचनां कृतवन्तः । स्वपार्श्वे उपवेशनार्थं स्थानम् अपि दत्तवन्तः । 'धैर्यस्य

मधुरं फलम्' इति उक्तिम् अहं स्मृतवान्। अहं बहु-श्रान्तः आसम्। मम शिरोवेदना जायमाना आसीत्। यदा मम कृते आसनस्य अत्यधिका आवश्यकता आसीत् तदा ईश्वरः तस्य प्रबन्धनं कृतवान्।

पठन्तु वार्तालापं च कुर्वन्तु –

प्रश्नः१. गान्धि-महोदयः रेल-यात्रायै रेल-स्थानकं प्राप्तवान्। सः रेल-स्थानकं यावत् यात्रां कथं कृतवान्?

प्रश्नः२. गान्धि-महोदयस्य युगे गमनागमनाय रेलयानम्, मोटर-यानम्, अश्वशकटम्, वृषभशकटम्, द्विचक्रिका इत्यादीनाम् अधिकः प्रयोगः दृश्यते स्म। भवान्/भवती आधुनिके युगे यात्रायै कानि नूतनानि साधनानि पश्यति?

प्रश्नः३. कस्याम् अपि यात्रायां पुरुषाणां सङ्ख्या अधिका वर्तते। स्त्रियः तु अल्पाः एव दृश्यन्ते। केन कारणेन?

प्रश्नः४. यथा गान्धि-महोदयः स्वयात्रां स्मृतवान्, किं भवन्तः काम् अपि स्वीयां यात्रां स्मरन्ति? तस्याः सन्दर्भे वदन्तु।

प्रश्नः५. अनेकेषु ग्रामेषु अद्यापि गमनागमनाय न्यूनं सौविध्यं वर्तते। तत्रत्यानां स्थानानां जनानां कृते कीदृश्यः समस्याः जायन्ते? भवन्तः स्वक्षेत्रस्य अनुभवम् आधृत्य वदन्तु।

भारतीय-राष्ट्रिय-कांग्रेसदलस्य आमन्त्रणे गान्धि-वर्यः १९१७ तमे वर्षे लाहौरनगरात् कलकत्तानगरपर्यन्तं यात्रां कृतवान्। सः तदापर्यन्तं 'महात्मा' इति उपाधिना विभूषितः न आसीत्। किन्तु मार्गे चलनसमये यदा जनाः तं पश्यन्ति स्म, तदा तस्य नाम्नः उद्घोषणं भवति स्म।

यात्रा

अहं भगिनी-गृहम् आगतवान् । द्वित्राणि दिनानि अत्र भविष्यामि । अनन्तरं गृहं प्रति गमिष्यामि । भगिनी अपि यदा कदा आगच्छति किन्तु तस्याः आगमनं निरन्तरं न भवति । आवाम् एकस्मात् गृहात् एव यात्राम् आरब्धवन्तौ । भगिनी मम अपेक्षया त्रिभिः वर्षैः ज्येष्ठा अस्ति । सा मयि बहु स्निह्यति । सा यत् किमपि खादति स्म मह्यम् अपि किञ्चित् ददाति स्म । अहम् अपि यदा कदा तस्यै स्ववस्तूनि ददामि स्म । किन्तु मम वस्त्राणि तस्याः कृते लघूनि भवन्ति स्म । भगिन्याः वस्त्राणि मम कृते दीर्घाणि भवन्ति स्म । एकस्मिन् अवसरे अहं तस्याः निचोलं धृतवान् । मां दृष्ट्वा सा अत्यन्तं हसितवती । तस्याः हसनस्य कारणम् अहं न अवगतवान् किन्तु तस्याः हसनेन अहम् अपि हसितवान् ।



अद्य प्रातः आरभ्य अहं तस्याः एव गृहे अस्मि । प्रातः आरभ्य सा हसन्ती अस्ति । तस्याः बालानां पत्युः च सर्वाणि कार्याणि तां विना न भवन्ति । अहं तया सह एकान्ते एव मेलितुम् इच्छामि । किन्तु सा सर्वदा बालकैः आवृता भवति। अस्माकं प्राङ्गणे सा बीजपूरकस्य वृक्षं रोपितवती । अस्मिन् ऋतौ सः वृक्षः प्रथमवारं फलितः । तत् फलम् अहं तस्याः कृते आनीतवान् । किन्तु बालकानां समक्षं दास्यामि तर्हि ते हसेयुः । अथवा भगिनी स्वयं न खादित्वा बालेभ्यः दास्यति अथवा बालाः तस्याः हस्तात् स्वीकुर्युः । अद्य रात्रौ अहं लोकयानेन प्रति गच्छामि ।

लोकयाने सर्वे निद्रां कृतवन्तः । किन्तु चालकः जागरितः अस्ति, तेन सह अहम् अपि जागरितः अस्मि । मार्गे अनेके आपणाः सन्ति । शीतकालस्य रात्रिः आसीत् । केवलम् एकस्य आपणस्य समीपे अग्निः प्रज्वलति । अन्यत् सर्वं रिक्तम् अस्ति । द्वौ कुक्कुरौ तत्र सुप्तौ स्तः । यदा कदा अल्पः प्रकाशः दृश्यते । क्षेत्रे किञ्चित् दूरम् एकः गोलदीपः प्रकाशमानः अस्ति । अन्यत्र सर्वत्र अन्धकारः अस्ति। लोकयानस्य दीपस्य प्रकाशेन मार्गः अल्पः एव दृश्यते।

इयं कीदृशी यात्रा अस्ति । कोऽपि न जानाति वयं कुत्र गच्छामः । सर्वे चालके विश्वसन्ति । लोकयानात् बहिः अपि जनाः सुप्ताः सन्ति । प्रातःकाले अहं गृहं प्राप्स्यामि।

मम प्रतीक्षायां माता प्राङ्गणे उपविशति । भगिनी मात्रे पूगकर्तरीं दत्तवती । अहं तां स्यूतस्य उपरि स्थिते कोषे स्थापितवान् । झटिति एव तां पूगकर्तरीं मात्रे दत्तवान् । माता बहु सन्तुष्टा । अहं स्यूतात् बीजपूरकं बहिः निष्कासितवान् । अधुना अहं तां शाखाम् अन्विष्यामि यस्याः तत् फलं त्रोटितवान् ।

— सुशील शुक्ल

पठन्तु वार्तालापं च कुर्वन्तु –

प्रश्नः १. लेखकः स्वभगिन्यै बीजपूरकं किमर्थं न दत्तवान् ?

प्रश्नः २. 'यात्रा' इति पाठस्य विषये स्व-अनुभवान् लिखन्तु ?

प्रश्नः ३. यात्राकाले लेखकः लोकयानात् बहिः किं किं दृष्टवान् ?

प्रश्नः ४. कदाचित् अल्पवयस्काः बालाः अपि स्वभगिन्याः वस्त्राणि धरन्ति इत्यस्मिन् विषये भवतां विचारान् लिखन्तु ?

प्रश्नः ५. अस्मिन् पाठे के के अंशाः भ्रातृभगिन्योः मध्ये स्नेहभावं प्रदर्शयन्ति ?

प्रश्नः ६. भवन्तः/भवत्यः कैः कारणैः यात्रां कृतवन्तः/कृतवत्यः ?

पठन्तु योजयन्तु च –

खण्डः - क	**खण्डः- ख**
क. अगच्छन् वैनतेयोऽपि	ङ. धर्मसाधनम् ।
ख. उदारचरितानां तु	घ. न करोति शब्दम् ।
ग. कर्मण्येवाधिकारस्ते	छ. बहुली भवन्ति ।
घ. सम्पूर्णः कुम्भो	ञ. क्रमशः पूर्यते घटः ।
ङ. शरीरमाद्यं खलु	ग. मा फलेषु कदाचन ।
च. महाजनो येन गतः	क. पदमेकं न गच्छति ।
छ. छिद्रेषु अनर्थाः	झ. यस्य तृष्णा विशाला
ज. सत्संगतिः कथय	ख. वसुधैव कुटुम्बकम् ।
झ. सः तु दरिद्रः	च. सः पन्था ।
ञ. जलबिन्दुनिपातेन	ज. किं न करोति पुंसाम् ।

प्रश्नः३. भवतः/भवत्याः ग्रामे नगरे वा यात्रायाः कानि कानि साधनानि सन्ति ? अधोलिखितेषु साधनेषु गमनागमनाय भवान् / भवती केषां साधनानाम् उपयोगं करोति ? उपयुज्यमाने वस्तुनि (✓) इति चिह्नं योजयतु।

क) लोकयानम् (बसयानम्) ङ) बाईक / स्कूटर

ख) रेलयानम् च) विद्युत्-त्रिचक्रिकायानम् (ई-रिक्शा)

ग) मेट्रोयानम् छ) कारयानम् (टैक्सी)

घ) जीपयानम् ज) भारवाहकयानम् (ट्रक)

प्रश्नः४. भवान्/भवती स्वकीयायाः कस्याश्चित् स्मरणीय-यात्रायाः विशिष्ट-अनुभवान् अत्र लिखतु।

प्रश्नः ५. कस्यै यात्रायै कीदृशी सज्जता करणीया ? स्वविचारान् अत्र लिखन्तु।

चतुर्विंशति-होरात्मिका घटिका

एकस्मिन् दिने चतुर्विंशतिः होराः भवन्ति । सामान्यतया वयं समयं द्रष्टुं १२ होरात्मिकायाः घटिकायाः प्रयोगं कुर्मः । अस्याः होरायाः सूचिका सम्पूर्णे दिवसे घटिकायाः चक्रद्वयं पूरयति । रात्रेः द्वादशवादनतः मध्याह्नस्य द्वादशवादन-पर्यन्तं समयः AM (प्रातः पूर्वाह्णः वा) एवं लेखनीयः । मध्याह्नस्य द्वादशवादनतः रात्रेः द्वादशवादनपर्यन्तं समयः PM (सायम् अपराह्णः वा) इति कथ्यते। चतुर्विंशति- होरात्मिकायां घटिकायां समयस्य दर्शनस्य विशिष्टः विधिः अस्ति । यथा - प्रातः ५ वादनस्य कृते ५:०० इति तथा च सायं इत्यस्य कृते १७:०० इति लिख्यते । एतादृशीनां घटिकानां प्रयोगः रेलयान-स्थानकेषु वायुयान-स्थानकेषु च भवति ।

समय-सारिणी

पीयूषः महाबोधि-एक्सप्रेस इत्यत्र उपविश्य देहलीतः प्रयागराजरेलयान-स्थानकपर्यन्तं यात्रां करिष्यति । अस्य रेलयानस्य समय-सारिणीं समयं चतुर्विंशति-होरात्मिकायाः घटिकायाः अनुसारेण प्रदर्शयति ।

१२३९८ महाबोधि एक्सप्रेस समय-सारिणी

क्र. सं.	रेल-स्थानस्य नाम	प्राप्ति-समयः	प्रस्थानसमयः	दूरता (किलोमीटरपरिमिते)
१.	नवदेहली	————	१२:१०	————
२.	अलीगढ-यानम्	१३:५१	१३:५३	१३१
३.	कानपुर-सेन्ट्रलयानम्	१७:३०	१७:४०	४४०
४.	प्रयागराज-जंक्शनयानम्	२०:१०	२०:१५	६३५

अधुना महाबोधि-एक्सप्रेस इति रेलयानस्य समय-सारिणीं दृष्ट्वा वदन्तु –

१. पीयूषः कदा प्रयागराजं प्राप्स्यति ? द्वादश-होरात्मिकायां घटिकायां तावति काले कः समयः भविष्यति ?

२. नवदेहलीतः प्रयागराज-रेलयान-स्थानकं प्राप्तुं कः समयः भविष्यति ?


३. नवदेहलीतः प्रयागराज-रेलयान-स्थानकं कियत् किलोमीटर-परिमितं दूरं वर्तते

४. अलीगढ-रेलयान-स्थानकात् प्रयागराजः कियत् दूरं वर्तते ?

शिक्षक-निर्देशः — शिक्षकः चतुर्विंशति-होरात्मिकायां घटिकायाम् अथवा द्वादश-होरात्मिकायां घटिकायां समयं द्रष्टुं सहभागिनः प्रेरयेत् । चतुर्विंशति-होरात्मिकायां घटिकायां समयं दृष्ट्वा द्वादश-होरात्मिकायां परिवर्तनं कथं करणीयम् इति पाठयेत् । रेलयानसारणीम् आश्रित्य सहभागिनः कृते अभ्यासाय अवसरं कल्पयेत् ।

रेलचिटिका

अत्र पीयूषस्य रेल-चिटिका उदाहरणरूपेण प्रदत्ता अस्ति –



१. पीयूषस्य रेलयानस्य नाम किम् अस्ति ?

२. पीयूषस्य रेलयानस्य सङ्ख्या का अस्ति ?

३. रेलयानस्य शकटस्य (रेलयानकोच) सङ्ख्या का अस्ति ?

४. पीयूषस्य आसनस्य सङ्ख्या का ?

५. पीयूषस्य आयुः कियत् अस्ति ?

६. नव-देहलीतः प्रयागराज-पर्यन्तं रेलचिटिकायाः शुल्कं किम् अस्ति ?

७. यदि सः चिटिकां क्रेतुं पञ्चशतं रूप्यकाणि यच्छति तर्हि सः पुनः कति रूप्यकाणि प्राप्स्यति ?



दत्त्वा चिटिकायाः क्रयणे कियत् अवशिष्टम्

_____



दत्त्वा चिटिकायाः क्रयणे कियत् अवशिष्टम्

_____

रेलयानस्य चिटिकायां प्रदत्ताः सूचनाः पठित्वा वदन्तु लिखन्तु च -



शुभ यात्रा HAPPY JOURNEY

पी एन आर नं. PNR NO.	गाड़ी नं. TRAIN NO.	तिथि DATE	कि.मी. K.M	वयस्क ADULT	बच्चे CHILD	टिकट नं. TICKET NO.
423-4888961	12429	30-01-2012	705	1	0	A 10698864 /10698864

श्रेणी CLASS — JOURNEY CUM RESERVATION TICKET — से आरक्षित PRS-SC

उवाता बेंगलूरु सिटी जं. सिकंदराबाद जं.
BANGALORE CY JN SECUNDERABAD JN तक आरक्षित / RESV. UP TO 313

कोच COACH	सीट/बर्थ SEAT/BERTH	लिंग SEX	आयु AGE	यात्रा प्राधिकार T.AUTHORITY	रियायत CONC	आ.शु. R.FEE	शु. प्र. S.CH.	सु. प्र. SF.CH	वाउचर रू. VOUCH. Rs.	कु. नकद रू. T.CASH Rs.
B4	1 LB	F	25	NV		20				1085

Rs.ONE ZERO EIGHT FIVE ONLY

RAJDHANI EXP 2RD BANGALORE CY JN SCH DEP 30-01 20:20 ARR 31-01 07:35
313 04-11-2011 16:55 JET 1 VIA DMM

- कुत्र पर्यन्तं यात्रा भविष्यति ? _____
- यात्रायाः तिथिः का अस्ति ? _____
- यात्रायां कियान् व्ययः भवति ? _____
- चत्वारः यात्रिणः भवन्ति तर्हि यात्रा-व्ययः कियान् भविष्यति ?

  _____
- यात्रापत्रस्य यात्रिकनाम-सञ्चयसङ्ख्या (PNR Numbers) का अस्ति ?

  _____

दिनदर्शिका

२०२४

जनवरीमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
	१	२	३	४	५	६
७	८	९	१०	११	१२	१३
१४	१५	१६	१७	१८	१९	२०
२१	२२	२३	२४	२५	२६	२७
२८	२९	३०	३१			

फरवरीमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
				१	२	३
४	५	६	७	८	९	१०
११	१२	१३	१४	१५	१६	१७
१८	१९	२०	२१	२२	२३	२४
२५	२६	२७	२८	२९		

मार्चमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
					१	२
३	४	५	६	७	८	९
१०	११	१२	१३	१४	१५	१६
१७	१८	१९	२०	२१	२२	२३
२४	२५	२६	२७	२८	२९	३०
३१						

अप्रैलमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
	१	२	३	४	५	६
७	८	९	१०	११	१२	१३
१४	१५	१६	१७	१८	१९	२०
२१	२२	२३	२४	२५	२६	२७
२८	२९	३०				

मईमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
			१	२	३	४
५	६	७	८	९	१०	११
१२	१३	१४	१५	१६	१७	१८
१९	२०	२१	२२	२३	२४	२५
२६	२७	२८	२९	३०	३१	

जूनमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
						१
२	३	४	५	६	७	८
९	१०	११	१२	१३	१४	१५
१६	१७	१८	१९	२०	२१	२२
२३	२४	२५	२६	२७	२८	२९
३०						

जुलाई-मास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
	१	२	३	४	५	६
७	८	९	१०	११	१२	१३
१४	१५	१६	१७	१८	१९	२०
२१	२२	२३	२४	२५	२६	२७
२८	२९	३०	३१			

अगस्तमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
				१	२	३
४	५	६	७	८	९	१०
११	१२	१३	१४	१५	१६	१७
१८	१९	२०	२१	२२	२३	२४
२५	२६	२७	२८	२९	३०	३१

सितम्बरमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०					

अक्टूबरमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
		१	२	३	४	५
६	७	८	९	१०	११	१२
१३	१४	१५	१६	१७	१८	१९
२०	२१	२२	२३	२४	२५	२६
२७	२८	२९	३०	३१		

नवम्बरमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
					१	२
३	४	५	६	७	८	९
१०	११	१२	१३	१४	१५	१६
१७	१८	१९	२०	२१	२२	२३
२४	२५	२६	२७	२८	२९	३०

दिसम्बरमास:

रवि.	सोम.	मंगल.	बुध.	गुरु.	शुक्र.	शनि.
१	२	३	४	५	६	७
८	९	१०	११	१२	१३	१४
१५	१६	१७	१८	१९	२०	२१
२२	२३	२४	२५	२६	२७	२८
२९	३०	३१				

एकस्मिन् वर्षे १२ मासाः भवन्ति । केचन मासाः ३० दिनात्मकाः भवन्ति, केचन ३१ दिनात्मकाः भवन्ति । फरवरीमासः २८ अथवा २९ दिनात्मकः भवेत् । वर्षस्य प्रारम्भिकमासः जनवरीमासः एवं च अन्तिममासः दिसम्बरः अस्ति ।

यत् वर्षं चतुर्-संख्यया विभाजने सति ० अवशिष्टं भवेत्, तदा तस्य वर्षस्य फरवरीमासः २९ दिनात्मकः भवति । यथा – २०१६ एवं च २०२० इत्यत्र फरवरीमासः २९ दिनात्मकः आसीत् । २०२४ एवं च २०२८ इत्यत्र फरवरीमासः २९ दिनात्मकः भविष्यति ।

एकस्मिन् वर्षे ३६५ दिनानि भवन्ति । यस्मिन् वर्षे फरवरीमासः २९ दिनात्मकः भवति । तस्मिन् वर्षे ३६६ दिनानि भवन्ति ।

वयं सर्वे जानीमः यत् सप्ताहे ७ दिनानि भवन्ति । दिनदर्शिकायां प्रथमः रविवासरः एवं च अन्तिमः शनिवासरः अस्ति । दिनदर्शिकायां प्रत्येकं मासस्य गणना भवति । यथा – मासे कति सप्ताहाः भवन्ति ? कस्मिन् दिने कः दिनाङ्कः भविष्यति ? इत्यादयः

■ अधः प्रदत्तां जनवरीमासस्य दिनदर्शिकां पूरयन्तु -

रविवासरः	सोमवासरः	मंगलवासरः	बुधवासरः	गुरुवासरः	शुक्रवासरः	शनिवासरः
	१	२	३			६
			१०			
	१५					२०
२१				२५		
			३१			

दिनदर्शिकां दृष्ट्वा वदन्तु -

- अस्मिन् मासे कति रविवासराः भविष्यन्ति ? _____
- १९ दिनाङ्के कः वासरः भविष्यति ? _____
- मासस्य चतुर्थे शनिवासरे कः दिनाङ्कः भविष्यति ? _____
- किं १९ दिनाङ्के सोमवासरः भविष्यति ? _____
- यदि पीयूषः ६ दिनाङ्के यात्रां प्रारभ्य १५ दिनाङ्के यात्रां समापयति तर्हि तेन कतीनां दिनानां यात्रा कृता ? _____
- भवान्/भवती कथं ज्ञातवान्/ज्ञातवती ? _____
- एषः मासः कस्मिन् दिनाङ्के समाप्यते ? _____
- राधा शुक्रवासरस्य अवकाशं प्राप्नोति किं राधा अस्मिन् मासे ५ दिनानाम् अवकाशं प्राप्स्यति ? _____

शिक्षकनिर्देशः — दिनदर्शिकायाः साहाय्येन द्वयोः दिनाङ्कयोः अथवा त्रयाणां दिनाङ्कानां मध्ये कति दिनानि भवन्ति इति। शिक्षकः सहभागिनः गणयितुं प्रेरयेत्।

वर्णमाला

स्वरवर्णाः

अ आ इ ई उ ऊ ऋ ॠ ऌ

ए ऐ ओ औ


अं अनुस्वारः अः विसर्गः

व्यञ्जनवर्णाः

क	ख	ग	घ	ङ	स्पर्श-वर्णाः
च	छ	ज	झ	ञ	
ट	ठ	ड	ढ	ण	
त	थ	द	ध	न	
प	फ	ब	भ	म	
य	व	र	ल		अन्तःस्थ-वर्णाः
श	ष	स	ह		ऊष्म-वर्णाः

संयुक्तवर्णाः

क्ष त्र ज्ञ श्र द्य



विद्ययाऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING